# सिद्धान्तज्योतिषे तिथिस्वरूपम्

**डॉ० प्रकाशपाण्डेयः**

सम्प्रति हि पंचाङ्गावयवभूतां तिथिमधिकृत्य महान विवादः प्रचलति। तत्र 'हक्– प्रत्ययकारिका कदम्बप्रोतीया एव तिथिर्ग्राह्या' इति केषाश्चिन्मतम्। 'बाणवृद्धिरसक्षया ध्रुवपोतीया एव तिथिर्ग्राह्या' इत्यपरेषां मतम्।

अत्र ब्रूमः–इदानीन्तनेषु पश्चांगेषु 'सप्तवृद्धिदशक्षया' तिथिरेव व्यवह्रियते, न तु बाणवृद्धिरसक्षयेति। तत्रादाविदं विचारणीयं यत् कया रीत्या साधिता तिथिः शुद्धा दृक्प्रत्यय–कारिका च भवेदिति।

सूर्याचन्द्रमसोः सकाशादेव तिथिसाधनं क्रियते। तच्च सूर्याचन्द्रमसोरस्थिरत्वात् तिथिमानं न शाश्वतिकं भवितुमर्हति। अतो भवेन्नाम कदाचित् कस्मिन् काले बाणवृद्धिरसक्षयात्मिका तिथिः शुद्धा, इदानीं तु सा न व्यवहारयोग्या। इतिहासप्रपृष्ठावलोकनेनेदं स्पष्टं यत् कालभेदात् तिथेरपि ह्रसवृद्ध्योः क्रमे परिवर्तनं भवितुमर्हति।